# Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Suprabhatam

# શ્રીદક્ષિણશેષાચલેશશ્રીનિવાસભગવત્સુપ્રભાતમ્

## Document Information

Text title : Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Suprabhatam

File name : dakShiNAsheShAchaleshashrInivAsabhagavatsuprabhAtam.itx

Category : vishhnu, suprabhAta, venkateshwara

Location : doc_vishhnu

Author : saralakavi rAghavAchArya

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : for the Deity on the hill of Vaiyavur

Latest update : March 20, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીદક્ષિણશેષાચલેશશ્રીનિવાસભગવત્સુપ્રભાતમ્

શ્રીમતે પ્રસન્નવેઙ્કટેશશ્રીનિવાસાય નમઃ ।
કૌસલ્યાસુપ્રજા રામ પૂર્વાસન્ધ્યા પ્રવર્તતે ।
ઉત્તિષ્ઠનરશાર્દૂલ કર્તવ્યં દૈવમાહ્નિકમ્ ॥ ૧॥

ઉત્તિષ્ઠોત્તિષ્ઠગોવિન્દ ઉત્તિષ્ઠ ગરુડધ્વજ ।
ઉત્તિષ્ઠ કમલાકાન્ત ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૨॥

ઉત્તિષ્ઠાદિવરાહત્વમુત્તિષ્ઠ કમલાનિધે ।
કટાક્ષૈઃ કરુણાદિગ્ઘૈઃ સ્વામિન્ પાલય વિષ્ટપમ્ ॥ ૩॥

કારુણ્યપૂર્ણહૃદયે જગતાં ત્રયાણાં
    માતસ્સુસુન્દરતનો નિગમાભિનુત્યે ।
પત્યુર્હરેરુરસિનિત્યવિહારશીલે
    શ્રીશ્રીનિવાસદયિતેતવસુપ્રભાતમ્ ॥ ૪॥

તવ સુપ્રભાતમરવિન્દદૃક્પ્રિયે
    ભુજગાચલેશભુજમધ્યમન્દિરે ।
સુરસુન્દરીભિરખિલાભિરાદરાત્
    કલિતાર્હણેઽસ્તુ કલિકલ્મષાપહે ॥ ૫॥

દિવ્યો ભવત્પ્રિયતમઃ કિલ સૂરિસઙ્ઘો
    હંહો વિકસ્વરદયાદિગુણં ભવન્તમ્ ।
નિર્વેષ્ટુમેતિ લઘુ દક્ષિણશેષશૈલં
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૬॥

વાણીવિહારરુચિરાસ્યચતુષ્ટયાત્સ્વાત્
    નિર્ગચ્છતો યુગપદૃઙ્મુખવેદરાશેઃ ।
વાક્યૈર્વિધિત્સુરજ એતિ સુમૈસ્તવાર્ચાં
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૭॥

સપ્તસ્વરીમધુરસામગિરાં સુગાનાત્
    ત્વત્પ્રીણનાય સ શિવઃ શિવયા સમેતઃ ।
આરુહ્ય નન્દિનમુપૈતિ તવાન્તિકન્દ્રાક્
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૮॥

લક્ષ્મ્યા ત્વયાચ કિલ લમ્ભિતરાજ્યલક્ષ્મી-
    ર્દિવ્યાં સ્રજં ત્વદુરસઃ પરિમણ્ડનાર્હામ્ ।
આદાય ભક્તિભરિતો મઘવૈતિ શચ્યા
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૯॥

દેવ ત્વદીયકરુણાં બહુલામભીપ્સન્
    વહ્યં નિજં સમધિરુહ્ય સહાગ્રજેન ।
ધામોપયાતિ તવ ષડ્વદનો રયેણ
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૦॥

દેવા ઇમે નિજસુધાશનતાપ્રસિદ્ધૌ
    કૂર્મત્વમન્થનસુસુન્દરમોહિનીત્વૈઃ ।
નાનોપકર્તુરિહ તે નમનાય સજ્જાઃ
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૧॥

સૌન્દર્યસાન્દ્રવપુષો નવયૌવનાઢ્યા
    વાસોવિભૂષણસુમૈઃ પરિભૂષિતાઙ્ગાઃ ।
દેવસ્ત્રિયસ્તવસમીપમિમાઃ પ્રપન્નાઃ
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૨॥

આદિત્યચન્દ્રકુજચાન્દ્રિ સુરાર્યકાવ્ય-
    મન્દાશ્ચ રાહુરિતિ કેતુરિતિપ્રતીતૌ ।
એતે ગ્રહા નવ પુરસ્તવ ભાન્તિ ભક્ત્યા
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૩॥

સ્વર્લોકરક્ષક ઇતિ પ્રથિતો મરુત્ત્વાન્
    સાહ્યાય યં શ્રયતિ સૈષ ગુરુઃ પુરસ્તે ।
સન્તિષ્ઠતે પિપઠિષુર્દિવસસ્ય શુદ્ધિં
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૪॥

સ્વર્લોકવૈણિકવરૌ ચ મિથસ્સખાયૌ
    શેષાદ્રિ મેત્ય લઘુ નારદતુમ્બુરૂ દ્વૌ ।

ઉદ્ગાયતસ્તવયશો મધુરં પુરસ્તાત્
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૫॥

ઊરોસ્તવોદયવતી વિદિતોર્વશીયં
    નાટ્યેન તાવકમનઃ પરિતોષણાય ।
હર્મ્યં વિશત્યહહ તેસહિતાપ્સરોભિઃ
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૬॥

મન્દાકિનીસલિલમધ્યવિગાહ પૂતાઃ
    સપ્તર્ષયસ્સુકૃતિનઃ પરિગૃહ્ય પદ્માન્ ।
દિવ્યાં સ્તવાર્ચનવિધૌ ત્વરયોપયાતાઃ
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૭॥

નાર્યો નરાશ્ચ સુજલાપ્લવનેન શુદ્ધા-
    ધૌતામ્બરાસ્સુતિલકાભરણા વિનીતાઃ ।
ધામોપયન્તિ તવપાદનિષેવણાય
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૮॥

વારાહતીર્થકલિતાપ્લવના મહાન્તો
    વૈખાનસાઃ સુહૃદયા લસદૂર્ધ્વપુણ્ડ્રાઃ ।
નિત્યાર્ચનાય તવ મન્દિરમાશ્રુયન્તિ
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૧૯॥

શ્રીવૈષ્ણવાસ્સુમનસસ્સુધૃતોર્ધ્વપુણ્ડ્રાઃ
    સાન્ધ્યં સમાપ્ય વિધિમાસ્થિતવેદનાદાઃ ।
સઙ્ઘીભવન્તિ ભવદઙ્ઘ્રિનિષેવણાય
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૨૦॥

ત્વત્કૈઙ્કરીપ્રવણવાક્તનુમાનસોઽયં
    સીતાદિરામ ઇતિ શોભનનામધેયઃ ।
પ્રાસાદમેતિ શુભવસ્તુકરૈસ્સહ સ્વૈઃ
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૨૧॥

વારાહપુષ્કરણિકાજલપૂર્ણકુમ્ભાન્
    મૂર્ધ્નાવહન્ત ઉપયાન્તિ સબાધઘોષાઃ ।
દેવ ત્વદીય પરિચાર કૃતિપ્રવીણાઃ
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૨૨॥

ત્વદ્વિશ્વરૂપવિધયે ચ પુરઃ સ્થિતા તે
    વત્સેન સાકમિહ કામદુઘાસમા ગૌઃ ।
હેષારવં મધુરમાતનુતે તુરઙ્ગઃ
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૨૩॥

ક્રીડાશુકાઃ કનકપઞ્જરગર્ભભાજઃ
    ત્વદ્ભુક્તશેષપય આદ્યુપયોગહૃષ્ટાઃ ।
નામાનિ તે શ્રુતિસુખાનિ પઠન્તિ રમ્યં
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૨૪॥

પ્રાચ્યામુદેતિ સવિતા વિકસન્તિપદ્મા
    ભૃઙ્ગાવલિર્ધ્વનતિ હૈ મધુપાનમત્તા ।
વાતસ્સુશીતસુરભિઃ પરિવાતિ મન્દં
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૨૫॥

કાલે પ્રબુધ્ય વિહગાસ્તરુવાસિનોઽમી
    આહાર્યસઙ્ગ્રહકૃતે બહિરુત્પતન્તઃ ।
હૈ કીશુકીશિતિ મનોહરમાસ્વનન્તિ
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૨૬॥

આશ્લિષ્ય કાન્તમભિહૃષ્યતિ ચક્રવાકી
    ઘૂકા વિશન્તિ તરસા તરુકોટરાણિ ।
અન્ધં તમો ગિરિગુહામધિગમ્ય લીનં
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૨૭॥

ગોપ્યશ્ચ ભાણ્ડદધિમન્થનસક્તહસ્તાઃ
    કૃષ્ણાવતારચરિતાનિ સુપાવનાનિ ।
ગાયન્તિ હન્ત મધુરૈર્નિજકણ્ઠનાદૈઃ
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૨૮॥

સર્વેશ સર્વગુણસાગર સર્વબન્ધો
    સર્વાગમાભિનુત સર્વતનોઽન્તરાત્મન્ ।
યોગાધિરૂઢસનકાદિવિભાવ્યમાન
    શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૨૯॥

હૈમીનકચ્છપવરાહનૃસિંહખર્વ-

રૂપ પ્રવૃદ્ધ ભૃગુનન્દન રામ રામ ।
શ્રીકૃષ્ણ કર્કમધિરોઢુમનઃ પરેશ
શ્રીશ્રીનિવાસ ભગવન્ તવ સુપ્રભાતમ્ ॥ ૩૦॥

શ્રીશ્રીનિવાસભગવત્સ્તુતિસુપ્રભાત-
પદ્યાનિ યે ભુવિ પઠન્ત્યુષસીહ મર્ત્યાઃ ।
તેષાં પ્રસન્નવદનો ભગવાન્પ્રકામં
દત્તે મનોરથફલાન્યખિલાનિ સશ્રીઃ ॥ ૩૧॥

સરલમિમમુદારં રાઘવાર્યેણ ગીતં
ભુજગશિખરિવાસી સુપ્રભાતસ્તવં સ્વમ્ ।
શ્રુતિપથમુપનીય સ્મેરવક્ત્રઃ પ્રહર્ષાત્
પુલકિતનિખિલાઙ્ગો રાજતે શ્રીનિવાસઃ ॥ ૩૨॥

ઇતિ સરલકવિરાઘવાચાર્યગીતં
દક્ષિણશેષાચલેશશ્રીનિવાસભગવત્સુપ્રભાતં સમ્પૂર્ણમ્ ।
શુભમસ્તુ । શ્રીઃ ।

Proofread by Aruna Narayanan

*Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Suprabhatam*
pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*